उपशास्त्री-II                साहित्य
                                काव्यदीपिका

## परीक्षोपयोगी प्रश्नोत्तरी -

प्र०(1) - रसस्य किं स्वरूपम् ?

उत्तरम् → कारणान्यथ कार्याणि सहकारीणि यानि च।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः। लौकिकव्यवहारे स्थायिशब्देन व्यवह्रियमाणस्य स्थायिभावभूतस्य रतिः प्रीत्यात्मकश्चित्त वृत्तिविशेषः आदिर्यस्य स रत्यादिः। हावभावस्वेदस्तम्भरोमाञ्चादीनि कार्योत्पत्तौ झटिति प्रत्यायने वा सहायभूतानि निर्वेदावेगादीनि नाट्ये दृश्यकाव्ये च प्रतिपाद्येरन्।

प्र०(2) - करुणरसस्य किमुदाहरणम् ?

उत्तरम् - अदृष्टदुःखो धर्मात्मा सर्वभूत प्रियंवदः।
मयि जाते दशरथात् कथमुञ्छेन वर्तयेत्?॥
यस्य भृत्याश्च दासाश्च स्वादून्यन्नानि भुञ्जते।
कथं स भोक्ष्यते रामो वने मूलफलान्ययम्?॥

Renu Devi
04/06/21
राधाउमाकान्त सं० महावि० सुखसेना
पूर्णिया।

प्र०-1 श्लोकमिदं व्याख्येयम् ?

आपरितोषाद्विदुषां न साधु मन्ये प्रयोग विज्ञानम् ।
बलवदपि शिक्षितानामात्मन्य प्रत्ययं चेतः ॥

उत्तरम् → प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलस्य प्रथम अङ्कात् उद्धृतमस्ति।

प्रसङ्ग: — प्रस्तुतश्लोकः प्रस्तावनायाः विद्यते । नटी सूत्रधारा मध्ये अभिनय विषये वार्तालापः भवति, नाटक सम्बन्धि चर्चा कुर्वतः सूत्रधारस्योक्तिरियम् ।

एवं व्याख्या — विदुषां विपश्चिताम् आपरितोषाद् सन्तोषात् संतोष-प्राप्तिपर्यन्तम् यावत् विज्ञाः सन्तोषः न प्राप्नुवन्ति तावत् कालम् । प्रयोगविज्ञानम् प्रयोगस्य आंगिक-वाचिक-आहार्य सात्विकरूपाभिनय चतुष्टक्रिया कलापस्य विज्ञानम् विशेष शिक्षणम्, साधु सम्यगुत्कृष्टमेव स्थितम् इति तु न मन्ये न स्वीकरोमि, कुतः इति चेत्? तत्र समाधानं- शिक्षितानां विज्ञानां मादृशानामशिक्षितानां कथां तु दूरे तिष्ठतु, बलवदपि सुदृढमपि चेतः मनः आत्मनि स्वस्मिन् विषये अप्रत्यक्षम् अविश्वसनीयम् भवति। लोकेऽस्मिन् विषये अप्रत्यक्षम् अविश्वसनीयम् भवति। लोकोऽस्मिन् वस्तुतः सुशिक्षिता अपि जनाः मदीयेयं शिक्षा समुत्कृष्टेवेति निश्चेतुं न शक्नुवन्ति। मादृशानाम् मन्दमतीनां जनानां कथा तु दूरतः परिहरणीया अतएव सुविहितप्रयोगिना त्वया प्रकटितोऽपि विश्वासो न मयि समुचितः।

विद्वद्भिरेव निरीक्षणीयं मदीयाभिनय कौशलमिति अन्तर्हिताभिप्रायवात् अत्र पूर्वार्द्धे पर्यायोक्तिरलङ्कारः सामान्येन विशेषस्य समर्थनात्

P.T.O

शेष पृष्ठ

अभिज्ञानशाकुन्तलम्

उत्तरार्द्ध - अर्थान्तरन्यास द्वयोः अङ्गाङ्गिरूपेण सार्थकम् कैचित् तत्रार्थान्तरन्यासो अर्थापत्त्या संकीर्यते इति वदन्ति।
इयमार्यानाम् गीति (आर्या छन्दः)।

Renu Devi
04/06/21

राधा उमाकान्त सं० महावि० सुरखसेना, पूर्णिया।

उपशास्त्री-I खण्ड साहित्य
काव्यदीपिका

परीक्षोपयोगी प्रश्नोत्तरी

प्र०-(1) — ध्वनेर्भेदौ वर्णनीयौ ?

उत्तरम् → भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाऽभिधामूलौ ।
अविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्च ॥

लक्षणामूलः अभिधामूलश्चेति ध्वनेर्द्वौ भेदौ। तौ च क्रमेण अविवक्षितवाच्य, विवक्षितान्यपरवाच्यश्चेति नामभ्यामपि व्यपदिश्येते । तत्र अविवक्षितं - बाधितस्वरूपं वाच्यं यत्र सः अविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः, लक्षणामूलत्वादेवात्र वाच्यमविवक्षितम् ।

प्र०-(2) - विवक्षितान्यपरवाच्यस्य किं स्वरूपम् ?

उत्तरम् → विवक्षितञ्चान्यपरं वाच्यं यत्रापरस्तु सः ।
यत्र वाच्यं विवक्षितं - प्रकाशितरूपं सत् अन्यपरं - व्यङ्ग्यनिष्ठं सोऽपरः - विवक्षितान्यपरवाच्यो ध्वनिः। यत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यङ्ग्यार्थस्य प्रकाशकः
यथा - प्रदीपो घटस्य ।

Renu Devi
04/06/21
राधारमाकान्त सं० महाविद्यालय सुखसेना, पूर्णिया